प्रोक्षणादावपि । अयं मुख्यक्रमः अनेन क्रमेण यद्यङ्गान्यनुष्ठीयन्ते तदाङ्गानां नियता प्रधानप्रत्यासत्तिरनुगृहीता भवति एवं ह्यङ्गप्रधानयोर्यावदनुष्ठानमेव व्यवधानं भवति इतरथा तु पश्चाद्भाविनः प्रधानस्य प्रथमाङ्गं क्रियमाणं प्रधानेनात्यन्तं व्यवहितं स्यात् ।

अथ प्रवृत्तिक्रम उच्यते यत्र बहूनि हवींषि भवन्ति समानदैवतानि यथा वाजपेये पशवः तत्र चोपाकरणादयः संनिपातिनः प्रतिपश्वावर्त्तनीयाः । तेषां चावृत्तिर्नैकस्य पशोः कार्त्स्न्येन कृत्वा परस्यापि तथैव क्रियन्त इत्येवम् । किं तर्हि ? सर्व्वेषामुपाकरणं यतः कुतश्चित् पशोरारभ्य कृत्वा ततः सर्व्वेषां नियोजनमित्युक्तम् । तत्र प्रथमे पदार्थे उपाकरणे अनियम एव यतः कुतश्चित् पशोरारभ्य कर्त्तव्यः । द्वितीयस्य पदार्थो नियोजनरूपः किं प्रथमो यत्र आरब्धः तत्र एवारम्भणीयः ? उत तत्राप्यनियम एवेति ? तत्र क्रमनियमकारणानां श्रुत्यर्थपाठानामभावदनियमे प्राप्ते उच्यते प्रवृत्त्यैव नियमः । प्रथमः पदार्थो येन क्रमेण कृतः सएव क्रम उत्तरेष्वपि नियोजनादिषु नियंस्यते । कुतः ? पदार्थैः सह प्रधानं कर्त्तव्यमिति वचनात् सर्व्वे पदार्थाः प्रधानकालान्न विप्रकृष्टव्याः कथं? पदार्थैः सह प्रधानस्य वचनम् यावता “दर्शपूर्णमासाभ्यां यजेत प्राजापत्यैश्चरन्तः” इत्यादिषु प्रधानमात्रं श्रूयते उच्यते,समीहितं भावयेद्यागेनेत्ययमिति हि यजेतेत्यस्यार्थः । तत्र यस्यामेव वेलायां स्वर्गो भावने कर्त्तृत्वं प्रतिपद्यते तस्मिन् क्षणे करणेतिकर्त्तव्यते अपि व्याप्रियेते । अयमर्थः नात्र प्रधानं कर्त्तव्यं श्रूयते किन्तु प्रधानेन स्वर्गः कार्य इति करणविभक्तिनिर्द्देशाद्यागेनेष्टं कार्यमस्मिन्काले कुर्यादिति तेन स्वकार्यं सेतिकर्त्तव्यताकेन कर्त्तुं शक्यते नान्यथा । तस्मादितरस्य फलकरणेतिकर्त्तव्यत्वस्य युगपद्यजेतेत्यनेन कर्त्तव्यतयोच्यते । ततोऽन्यथा करणेतिकर्त्तव्यताकत्वमेव न स्यात् न हि पश्चाद्भावि करणं भवति । तथा भविष्यति भाव्ये भूते च करणे असावेव दोषः न हि विनष्टं करणं भवतीति । तथा करणेतिकर्त्तव्यतयोरपि मिथो विप्रकर्षे अयमेव दोषः । न हि विनष्टमनागतं वानुग्राहकं भवति । तेन सहवस्तु स्यामेककालतैषां व्यापाराणाम् । ततः प्रधाने सेतिकर्त्तव्यताके एकस्मिन् क्षणे सह कर्त्तव्ये प्राप्ते सति एकः कर्त्ता बहूनि प्रधानानि इतिकर्त्तव्यतां वा असमर्थः कर्त्तुं, यौगपद्ये नेत्यवश्यम्भावी कियानपि विप्रकर्षः । ईदृशेनापि विप्रकर्षेण सहैव पदार्थाः कृता भवन्ति । प्रयोगवचनो हि यावतः पदार्थाननुष्ठापयति तावद्भिरवर्जनीयतया यावान् कालो व्याप्यते तावानेकः कालः तावति च काले सर्वेषां कालो विधीयते न त्वेकस्मिन् क्षणे अशक्यार्थविधिप्रसङ्गात् । तेन प्रत्यासत्तिरेतेषां साहित्यम् नैकक्षणवर्तित्वम् । यद्येवम् प्रयोगवचनेनैव क्रमस्य सिद्धत्वात् श्रुत्यादिभिः किं क्रियते ? अनियतक्रमेणानुष्ठानं प्राप्नोतीति क्रमनियमे तेषां व्यापारः । यस्मात् प्रयोगविधिर्नैकक्षणवर्त्तित्वं विधत्ते प्रत्यासत्तिमात्रम् । तस्मात् प्रधानं चिकीर्षितमनागतं कृतं वा तेषां प्रधानार्थानामनुष्ठापकम् । करिष्यमाणेन कृतेन वा प्रधानेन प्रत्यासत्तिमात्रमङ्गानां तत्साहित्यम् नैकक्षणवर्त्तित्वम् । तत्राग्न्यन्वाधानादीनां करिष्यमाणं प्रधानं निमित्तम् स्विष्टकृदादीनां तु कृतम् । तेनैवमवश्यम्भाविनि विप्रकर्षे केचित्पदार्थाः क्षणव्यवहिताः प्रधानेनापेक्ष्यन्ते केचिद्द्वाभ्यां क्षणाभ्यां व्यवहिताः केचिद्बहुभिरिति । एवं वाजपेयपशुष्वपि अग्न्यन्वाधानादि प्रागुपाकरणात् साधारण्यं सर्वपशूनां सह अनुभूतम् । उपाकरणादयोऽपि संनिपत्योपकारकास्तन्त्रेणाविभवादावर्त्तयितव्या अपि साहित्येनैव पशुभिरनुभवितव्याः । यदैकस्योपाकरणम् तदैवेतरेषामपि कुतः ? सहचोदितत्वात्पशूनां साङ्गानाम् । तत्रैवं सहानुभवितव्ये सति यस्य पशोः प्रथममुपाकरणं क्रियते तस्य प्राकृतेन पाठेन यद्यपि द्वितीयः पदार्थो नियोजनरूपः स्थाप्यते तथापि सहवचनादेव एकविंशतिक्षणव्यवहितं द्वितीयं पदार्थमाकाङ्क्षति । द्वितीयस्तु पशुर्विंशत्योपाकरणक्षणैर्व्यवहितस्तेन प्रथमस्य पशोर्नियोजनक्षणेन च व्यवहितं स्वीयं द्वितीयं पदार्थमाकाङ्क्षति । एवं तृतीयादयोऽपि पशवः सजातीयविजातीयव्यवहितानात्मीयान् पदार्थानपेक्षन्ते । अन्त्यस्तु विजातीयैः पूर्वोपाकृतानामेकविंशतेः पशूनां नियोजनक्षणैर्व्यवहितमेव द्वितीयं पदार्थमपेक्षते । तदेवं संनिपत्योपकारकानालोच्य ईदृशो एकविंशतिक्षणव्यवधानापेक्षा प्रधानानां भवति । ततश्च यावद्भिर्व्यवहितः शक्यः पदार्थः कर्त्तुं तावद्भिर्व्यवधानमगत्यावश्यं कर्त्तव्यम् अतोऽभ्यधिकैस्तु न व्यवधातव्यम् । यद्येकं पदार्थमेकस्य कृत्वा द्वितीयोऽपि पदार्थस्तस्यैव क्रियते ततः सहवचनं नोपपद्येत । एवं सर्वत्र तृतीयादिष्वपि पदार्थेषु योज्यम् । प्रथमपदार्थक्रम एव द्वितीयादिष्वपि समाश्रयितव्यः इतरथा केषां चन व-